श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ द्वन्द्वपद्धतिः चतुर्विंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ द्वन्द्वपद्धतिः चतुर्विंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रपद्ये पादुकारूपं प्रणवस्य कलाद्वयम्।
ओतं मितमिदं यस्मिन्ननन्तस्यापि तत्पदम्॥ २४.१ ॥

मणिपादुकयोर्युगं मुरारेः मम नित्यं विदधातु मङ्गळानि।
अधिकृत्य चराचरस्य रक्षां अनुकम्पाक्षमयोरिवावतारः॥ २४.२ ॥

चरणौ मणिपादुके ! मुरारेः प्रणतान् पालयितुं प्रपद्यमानम्।
विपदामिह दैवमानुषीणां प्रतिकारं युवयोर्द्वयं प्रतीमः॥ २४.३ ॥

मुरभिन्मणिपादुके ! भवत्योः विहितो नूनमसौ मिथो विभागः।
भजतामपरस्परप्रियाणां अविरोधाय सुरासुरेश्वराणाम्॥ २४.४ ॥

अहितोन्मथनाय संश्रितानाम् अलमालोकवशेन शब्दतो वा।
करयोश्च रथाङ्गपाञ्चजन्यौ मधुहन्तुः पदयोश्च पादुके ये॥ २४.५ ॥

अवधीरितसाधुपद्धतीनाम् अलसानां मधुवैरिपादुके द्वे।
इतरेतरसाहचर्यमित्थं प्रतिपन्ने इव दैवपौरुषे नः॥ २४.६ ॥

पार्श्वयोः सरसिजावसुन्धरे पादयोश्च मणिपादुके ! युवाम्।
सन्निकर्षथ न चेन्मधुद्विषः किं करिष्यति कृतागसां गणः॥ २४.७ ॥

पादुके ! भवभयप्रतीपयोर्भावयामि युवयोः समागमम्।
सक्तयोर्दनुजवैरिणः पदे विद्ययोरिव परावरात्मनोः॥ २४.८ ॥

रङ्गसीमनि रथाङ्गलक्ष्मणश्चिन्तयामि तपनीयपादुके !।
शापदोषशमनाय तत्पदे चक्रवाकमिथुनं कृतास्पदम्॥ २४.९ ॥

मानयामि जगतस्तमोपहे माधवस्य मणिपादुके ! युवाम्।
दक्षिणोत्तरगतिक्रमोचिते पद्धती इव मयूखमालिनः॥ २४.१० ॥

रङ्गनाथपदयोरलङ्क्रिया राजते कनकपादुकाद्वयी।
तद्विभूतियुगळीव तादृशी छन्दतः समविभागमाश्रिता॥ २४.११ ॥

साक्षात्पदं मधुभिदः प्रतिपादयन्त्यौ
मानोपपत्तिनियते मणिपादुके द्वे।
अन्योन्यसङ्गतिवशादुपपन्नचर्याम्
आज्ञां श्रुतिस्मृतिमयीमवधारयामि॥ २४.१२ ॥

विश्वोपकारमधिकृत्य विहारकाले-
ष्वन्योन्यतः प्रथममेव परिस्फुरन्त्योः।
दृष्टान्तयन्ति युवयोर्मणिपादरक्षे !
दिव्यं तदेव मिथुनं दिविषन्निषेव्यम्॥ २४.१३ ॥

द्वावेव यत्र चरणौ परमस्य पुंसः
तत्र द्विधा स्थितवती मणिपादुके ! त्वम्।
यत्रैव दर्शयति देवि ! सहस्रपात्त्वं
तत्रापि नूनमसि दर्शिततावदात्मा॥ २४.१४ ॥

पर्यायतो गतिवशान्मणिपादरक्षे !
पूर्वापरत्वनियमं व्यतिवर्तयन्त्यौ।
मन्ये युवां महति विष्णुपदे स्फुरन्त्यौ
सन्ध्ये समस्तजगतामभिवन्दनीये॥ २४.१५ ॥

अश्रान्तसञ्चरणयोर्निजसम्प्रयोगाद्
अम्लानतां चरणपङ्कजयोर्दिशन्त्यौ।
मान्ये युवां रघुपतेर्मणिपादरक्षे !
विद्ये बलामतिबलां च विचिन्तयामि॥ २४.१६ ॥

अन्तर्मोहादविदितवतामात्मतत्त्वं यथावत्
पद्यामित्थं परिचितवतां पादुके ! पापलोक्याम्।

नित्यं भक्तेरनुगुणतया नाथ पादं भजन्त्यौ
 निष्ठे साक्षात् स्वयमिह युवां ज्ञानकर्मात्मिके नः॥ २४.१७ ॥

न्यस्तं विष्णोः पदमिह महत् स्वेन भूम्ना वहन्त्योः
 आम्नायाख्यामविहतगतिं वर्तयन्त्योर्निजाज्ञाम्।
आसन्नानां प्रणयपदवीमात्मना पूरयन्त्योः
 द्वैराज्यश्रीर्भवति जगतामैकराज्ये भवत्योः॥ २४.१८ ॥

अप्राप्तानामुपजनयथः सम्पदां प्राप्तिमेवं
 सम्प्राप्तानां स्वयमिह पुनः पालनार्थं यतेथे।
साक्षाद्रङ्गक्षितिपतिपदं पादुके ! साधयन्त्यौ
 योगक्षेमौ सुचरितवशान्मूर्तिमन्तौ युवां नः॥ २४.१९ ॥

बद्धहरिपादयुगळं युगळं तपनीयपादुके ! युवयोः।
मोचयति संश्रितानां पुण्यापुण्यमयशृङ्खलायुगळम्॥ २४.२० ॥

॥ इति श्रीपादुकासहस्रे द्वन्द्वपद्धतिः चतुर्विंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥